International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(2): 228-230
© 2026 IJMH
www.themultijournal.com
Received: 24-03-2026
Accepted: 07-04-2026
Publish : 08-04-2026

**गौरी-वसाकः**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**गौरी-वसाकः**
शोधच्छात्रा, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# महाकविभर्तृहरिणा विरचिते शतकत्रये मानवीयमूल्यदर्शनम्

**गौरी-वसाकः**

**प्रबन्धसारः –**

अधुना समाजः कलुषितो जातः। सर्वत्र अन्यायस्य वातावरणं दृश्यते। अनैतिकाऽऽचरणेन, अनुचितविषयाऽऽवलम्बनेन, स्वकर्तव्यानां विस्मरणेन भारतस्य उन्नतिः क्रमेण ह्रसति। यदा भ्रष्टाऽऽचारस्य, दूराऽऽचारस्य अधर्मस्य वा अभिवृद्धिः भवति, तदा आदर्शसमाजनिर्माणे अस्माकं संस्कृतवाङ्मये विद्यमानानां मानवीयमूल्यबोधानाम् आवश्यकता नितराम् अनुभूयते।

**कूटशब्दाः-**

मानवीयमूल्यवोधः, दर्शनम्, पुरुषार्थचतुष्टयम्, पञ्चमहाभूतानि, स्थितप्रज्ञः।

**उपक्रमः –**

विधातुः सर्वोत्कृष्टा सृष्टिः मानवसृष्टिः – न मनुष्याद् वरं किञ्चिद् विद्यते। मानवजीवनं सर्वाधिकं मूल्ययुक्तम्। 'मूल्' इति धातोः 'यत्'- प्रत्ययेन 'मूल्य'-इति शब्दो निष्पद्यते। 'मूलँ प्रतिष्ठायाम्'-इति भ्वादिगणीयः 'मूल्'-इति धातुः प्रतिष्ठार्थः। मूल्यशब्दविषये अमरकोशे प्राप्यते – **'मूल्यं वस्नोऽप्यवक्रयः'**[1] इति। वस्नः नाम विक्रेयवस्तूनां मूल्यमिति। पुनः, अमरकोशे मूल्यशब्दस्य अन्योऽर्थः वेतनमिति उपलभ्यते। तथाच-

**"कर्मण्या तु विधा भृत्याभृतयो भर्म वेतनम्।**
**भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि॥"[2] इति।**

मानवीयमूल्यं देशकालभेदेन भिन्नमेव। मतिशीलः मनुष्यः संसारे विद्यमानं यथार्थं ज्ञानं प्राप्तुं सदा प्रयत्नवान् अस्ति। स केवलं साम्प्रतिके विषये एव निमग्नः न भवति, परन्तु भविष्यकालिकपरिणामस्य विषयेऽपि चिन्तितः अस्ति। स्वबुद्धिबलेन युक्तिपूर्वकं तत्त्वज्ञानं प्राप्तुं यः विचारः क्रियते तत् 'दर्शनम्' इत्युच्यते। मानवस्य संज्ञा का? तस्य जीवनस्य लक्ष्यं किम्? कोऽयं संसारः? केन प्रकारेण मानवस्य जीवनं यापनीयम्? – इत्यादीनां सर्वेषां प्रश्नानाम् उत्तरं दर्शनग्रन्थे प्राप्यते। अस्माकं देशः देवभूमिरूपेण प्रसिद्धः। अस्मिन्नेव भारतवर्षे युगशः अनेके कवयः आविर्भूय आदर्शरचनया सम्पूर्णं जगदिदं मानवीयमूल्यबोधेन प्लावितवन्तः। एतेषु अन्यतमः भर्तृहरिः।

**शतकत्रये मानवीयमूल्यदर्शनम् –**

महाकविभर्तृहरिः शतकत्रये मानवजीवनस्य अनुभवान् आधारीकृत्य विविधान् विचारान् अत्यन्तं सहजतया प्रतिपादितवान्। मानवजीवनस्य वास्तवचित्रणं तेन सम्यक्तया प्रकटीक्रियते, यथा – इह जगति कोऽपि मानवः वैराग्यमार्गस्य पथिकः, कोऽपि जनः न्यायमार्गेण चलति आजीवनम्, कोऽपि वा इन्द्रियाऽऽरामः कामादिषु निमग्नः। यतोऽस्यां मह्यां सर्वे भिन्नाः रुचीः बिभ्राणाः। भर्तृहरिणा उच्यते –

**"वैराग्ये संश्रयत्येको नीतौ भ्रमति चापरः।**
**श्रृङ्गारे रमते कश्चिद्भुवि भेदाः परस्परम्॥"[3] इति।**

अनेन महाकविना शतकत्रये पुरुषार्थचतुष्टयविषये (धर्मार्थकाममोक्षाः) स्वाभिमतं प्रकटीक्रियते। संसारस्य अनित्यतां, क्षणभङ्गुरताञ्च प्रदर्श्य विभिन्नं कर्तव्यम् उपदिष्टं तेन। प्रतिदिनम् उदितः सूर्यो यथा

क्षीणप्रभः भूत्वा सूर्यः अस्तं गच्छति। तथैव मानवानाम् आयुः क्षयति प्रत्यहं शनैः शनैः। अनेकेषु कर्मसु व्यस्ताः मानवाः न अनुभवन्ति कालदर्पम्। शैशवकालस्य पश्चात् यौवनकालः ततः वार्धक्यं अन्ते मरणं तु निश्चप्रचं, तथापि मानवस्य भयं नास्ति। अनेन प्रतीयते सम्पूर्णः संसारः अज्ञानमयः। कविना कथ्यते –

**"आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं**
**व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते।**
**दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते**
**पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत्॥"**[4] इति

जीवनस्य स्वल्पतां वीक्ष्य अमुना कविना प्रश्नः उत्थाप्यते-

**"आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं**
**तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।**
**शेषं व्यधिवियोगदुःखसहितं सेवादिभिर्नीयते**
**जीवे वारितरङ्गचंचलतरे सौख्यं कुतः प्राणिनाम्॥"**[5] इति

पुरुषार्थचतुष्टयस्य मूलभूतः आधारः धर्मः एव। स धर्मः न केवलं लौकिकपरलौकिक -विषयम् अपि च निःश्रेयससिद्धिम् उपदिशति। धर्मः एव मानवाय विशिष्टतां प्रयच्छति। धर्मयुक्तः मानवः विशेषः, धर्मविहीनः तु पशुसदृशः। उक्तञ्च –

**"आहारनिद्राभयमैथुनञ्च सामानयमेतद् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषः धर्मेण हीनाः पशुभिः समानाः॥"**[6] इति

कविना मन्यते यत् – अस्मिन् जगति धन-मान -जीवन-यौवनादीनि सर्वाणि चञ्चलानि केवलं धर्मः एव निश्चलः। विषयेऽस्मिन् चाणक्येन कथितम् -

**"चला लक्ष्मीश्चलाः प्राणाश्चलं जीवितयौवनम्।**
**चलाचले च संसारे धर्म एको हि निश्चलः॥"**[7] इति

धर्मानुकूलम् आचरणं जीवनमूल्यस्य उत्कर्षतां प्रकाशयति। सन्दर्भेऽस्मिन् धर्मस्य अभिप्रायः कः इति ज्ञातुं वयं सन्दिग्धमानाः स्मः। भगवता मनुना धर्मस्य दश लक्षणानि परिगण्यन्ते –

**"धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणन्॥"**[8] इति

यद्यपि धर्मस्य तत्त्वम् अत्यन्तं गुह्यम्, गुहानिहितञ्च। तस्य स्वरूपनिर्णये मतभेदाः सन्ति, विचारेषु ऐक्यं नास्ति। तथापि सद्भिः निर्दिष्टे मार्गे गमनम् एव धर्मः इत्युच्यते महाभारते –

**"श्रुतिर्विभिन्ना स्मृतयोऽपि भिन्ना नैको मुनिर्यस्य वचः प्रमाणम्।**
**धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥"**[9] इति

साम्प्रतिके समये सर्वे जनाः केवलं स्वहितं चिन्तयन्ति, स्वार्थसिद्धये परहितं निघ्नन्ति। परोपकारं मानवीयभावनां च आधारीकृत्य सत्पुरुषाणां चतुरः भेदान् आह महाकविभर्तृहरिः। संसारे बहवः जनाः स्वार्थचिन्तायुक्ताः सन्ति। ये जनाः स्वार्थं परित्यज्य अपरस्य हितं मङ्गलं च साधयन्ति ते सत्पुरुषाः। बहुजनहिताय बहुजनसुखाय सत्पुरुषाः सदा आत्मानम् उत्सृजन्ति। केवलं स्वहितसाधनं प्रति ते न कृतप्रयत्नाः भवन्ति। अधमाः जनाः स्वार्थसाधनाय बाधास्वरूपान् जनान् निहत्य आत्मसाधनपरायणाः दृश्यन्ते। एते अधमाः जनाः शरीरं धृत्वाऽपि राक्षसवत् विराजन्ते। आत्महितसाधनमेव तेषां व्रतम्। कतिचन जनाः परहितसाधनाय बाधकाः भवन्ति। तस्य जनस्य संज्ञा का भवतीति विषये कविः संशयं प्रकटितवान्। विषयेऽस्मिन् नीतिशतके उच्यते कविना –

**"एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये**
**सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये।**
**तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये**
**ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे॥"**[10] इति

पुरुषार्थचतुष्टयेषु सारभूततत्त्वरूपेण धर्मस्य प्रतिपादनं कृतम्। धर्माऽविरुद्धयोः अर्थकामयोः पुरुषार्थताऽपि प्रतिपाद्यते। भगवता श्रीकृष्णेनापि कथ्यते –

**"धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ॥"**[11] इति

इदं जगत् मायाप्रसूतम्। अतः मनुष्यैः आवश्यकतानुसारं अनासक्त-भावेन निष्कामभावेन वा वस्तूनि उपभोक्तव्यानि। अन्यस्य कस्यापि धनस्य लोभः न करणीयः। उक्तञ्च ईशावास्योपनिषदि –

**"ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।**
**तेन त्यक्तेन भुञ्जीथाः मा घृधः कस्यस्विद्धनम्॥"**[12] इति

अधुनातने समये जीवनमूल्यह्रासस्य कारणं अर्थोपार्जने पवित्रतायाः अभावः। संस्कृतवाङ्मये अर्थशुचितायाः सर्वोत्कृष्टता प्रतिपाद्यते। अर्थशुचिताविशये उच्यते –

**"सर्वेषामेव शौचानामर्थशौचं परं स्मृतम्।**
**योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः॥"**[13] इति

प्रयोजनातिरिक्तार्थसञ्चयस्य लिप्सा अनर्थस्य मूलं कारणम्। श्रीमद्भागवतानुसारं मानवस्य उदरपूरणं यावत् भोजनस्य अधिकारः अस्ति, इतोऽपि अधिकभोजने उत्सुका जनाः दण्डस्य अधिकारिणः भवन्ति-

**"यावत् भ्रियते जठरं तावत् स्वत्वं देहिनाम्।**
**अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति॥"**[14] इति

येन केनापि प्रकारेण अर्थसंग्रहणोपेक्षया मानवस्य कृते आत्मसन्तुष्टिः अतीवावश्यिकी। आत्मसन्तुष्टिम् अनुभवन्तः जनाः परमशान्तिं लभन्ते। कथितञ्च-

**"सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम्।**
**कुतस्तद् धनलुब्धानामितश्चेतश्च धावताम्॥"**[15] इति

मनसः शान्तिः जीवनस्य परमलक्ष्यम्। सुभाषितग्रन्थे उच्यते –

**"शान्त्यर्थं सर्वशास्त्राणि विहितानि मनीषिभिः।**
**ज्ञेयं स सर्वशास्त्रज्ञो यस्य शान्तं मनः सदा॥"**[16] इति

लोभरहितः जनः जितेन्द्रियः अस्ति। स शान्तः जनः सर्वेषु जनेषु समबुद्धिसम्पन्नः भवति। तस्य मनः सदैव सन्तुष्टः भवति, तस्य कृते सर्वाः दिशः आनन्दस्वरूपाः। श्रीमद्भागवतपुराणे कथितम् –

**"अकिंचनस्य दान्तस्य शान्तस्य समचेतसः।**
**यया सन्तुष्टमनसः सर्वाः सुखमया दिशः॥"**[17] इति

विवेकी पुरुषः स्वजीवने प्राप्तं सुखदुःखादिकं कदापि न गणयति। एतादृशः विवेकिपुरुष गीतायां स्थितप्रज्ञः इत्युच्यते। अस्माकं जीवनं सुखदुःखादिभिः परिपूर्णम् अस्ति। गच्छता कालेन सुखमागच्छति दुःखमपि आयाति। स्वकार्यसाधने व्यापृतस्य पुरुषस्य फलं प्रति दृष्टिः राजते, न तु आपतितं सुखदुःखं प्रति। कार्यपारङ्गमः जनः सुखदुःखं समानं गमयति। अतः कदाचित् भूमौ स्वपिति क्वचिच्च महार्हशय्यायां शेते, क्वचित् शाकान्नेन परितृप्तः तिष्ठति, क्वचिच्वा शाल्योदनादिभिः भोजनं प्रचलति, क्वचित् जीर्णशीर्णं वस्त्रखण्डं परिदधाति। एवम्प्रकारेण सुखदुःखं तुल्यमूल्यं विज्ञाय कर्मणि निरतः जनः कर्मसाफल्यं प्राप्नोति—

**"क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं**
**क्वचिच्छाकाहारी क्वचिदपि च शाल्योदनरुचिः।**
**क्वचित्कन्थाधारी क्वचिदपि च दिव्याम्वरधरो**
**मनस्वी कार्यारथी न गणयति दुःखं न च सुखम॥"**[18] इति

भर्तृहरिः कथयति यत् – कामरूपान्धकारात् उत्पन्ननेन अज्ञानेन इदं जगत् नारीमयं प्रतीयते, परन्तु विवेकस्वरूपस्य अंजनस्य व्यवहारेण नयनयोः आवरणं दूरीभूतं भवति दृष्टेः समता अपि आगच्छति। कविना कथ्यते –

**"यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं**
**तदा दृष्टं नारीमयमिदशेषं जगदपि।**
**इदानीमस्माकं पटुतरविवेकांजनजुषां**
**समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते॥"**[19] इति

इदं मानवशरीरं भौतिकम्। महाकविः भर्तृहरिः पञ्चमहाभूतं प्रति कृतज्ञतां प्रदर्श्य पृथ्वीं मातृरूपेण, वायुं पितृरूपेण, तेजसं मित्ररूपेण, जलं सुबन्धुरूपेण, आकाशं च भ्रातृरूपेण चिन्तितवान्। कविः करबद्धं प्रणामाञ्जलिं विधाय परब्रह्मणि आत्मानं विसर्जितुम् इच्छति। अस्य वर्णना वैराग्यशतके प्राप्यते –

**मातर्मेदिनि तात मारुत सखे तेजः सुबन्धो जल-**
**भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः।**
**युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-**
**ज्ञानापास्तसमस्तमोहमहिमा लीने परब्रह्मणि॥"**[20] इति

**उपसंहारः**

भर्तृहरिणा विरचिते शतकत्रये प्रतिविम्बितस्य मनवीयमूल्यबोधस्य दार्शनिकं तत्त्वम् अत्यन्तं व्यापकम्। जगतः अनित्यता, पुरुषार्थचतुष्टयस्य महत्त्वं, वैराग्यमार्गेण च मोक्षोपलब्धिश्च कवेः जीवनदर्शनस्य मुख्या विषयाः। समाजे सर्वेषां व्यवहारः सुश्रृङ्खलितः भवति चेत् मानवीयः मूल्यबोधः नितरां प्रतिष्ठितो भवतीति शम्।

**सहायकग्रन्थपञ्जी-**


१. संस्कृतवाङ्मयस्य इतिहासः; धीरेन्द्रनाथ-वन्द्योपाध्यायः; संस्कृत पुस्तक भाण्डार; कलकाता; २०१४।
२. श्रृङ्गारशतकम्; भर्तृहरिः; सम्पा. अनु. वावु-हरिदास-वैद्यः; हरिदास एराड कम्पनी; कलकता; १९२५
३. वैराग्यशतकम्; भर्तृहरिः; सम्पा. अनु. वावु-हरिदास-वैद्यः; हरिदास एराड कम्पनी; कलकता; १९२५
४. संस्कृत साहित्येर इतिहास; ड.देवकुमार-दासः; सदेश; कलकाता;२०१६ ।
५. नीतिशतकम्; भर्तृहरिः; सम्पा. अनु. अध्यापकः ड.उदयचन्द्र-वन्द्योपाध्यायः, ड. अनिता-वन्द्योपाध्यायः; संस्कृत वुक डिपो; २०१८
६. हितोपदेशः; विष्णुशर्मा; सम्पा.अनु.श्रीनारायण-राम-आचार्यः; चौखम्बा संस्कृत प्रतिष्ठान; दिल्ली
७. विशुद्ध मनुस्मृति; डाँ. सुरेन्द्रकुमार; आर्ष साहित्य प्रचार ट्रस्ट, 2017
८. महाभारत; गीताप्रेस; गोरखपुर।


**पाद टिप्पणी: -**

1. अमरकोशे – २.९.८०
2. अमरकोशे – २.१०.३९
3. श्रृङ्गारशतके - १०२
4. वैराग्यशतके - ४३
5. वैराग्यशतके - ४९
6. हितोपदेशे, प्रस्ताविकायाम्, २५
7. चाणक्यश्लोकः
8. मनुस्मृतौ, ६.९२
9. महाभारते, ३.३१७.११७
10. नीतिशतके - ७५
11. श्रीमद्भगवद्गीतायाम्, ७.११
12. ईशावास्योपनिषदि - १
13. मनुस्मृतौ – ५.१०६
14. श्रीमद्भागवते -७.१४.८
15. हितोपदेशे, मित्रलाभे - १४५
16. सुभाषितसंग्रहे
17. श्रीमद्भागवत्पुराणे – ११/१४/१३
18. नीतिशतके - ८२
19. श्रृङ्गारशतके - ६९
20. वैराग्यशतके - १००